# 1 अद्भुतम् देशप्रेम
## ( सन्धि-संयोगः )

सुगन्धा - सुहास! त्वं किं करोषि?

सुहासः - सुगन्धे! अहं देशभक्ति-कथानां संग्रहं करोमि।

सुगन्धा - किं त्वं जानासि यत् भारतीयानां समाः अन्यदेशानाम् जनाः अपि स्वदेशं प्रति अनुरागं कुर्वन्ति?

सुहासः - त्वं कथं जानासि?

सुगन्धा - अस्माकं पुस्तके एका अद्भुत्-कथा अस्ति, या प्रकटयति यत् अन्यदेशवासिनः अपि स्वदेशं प्रति अनुरागं कुर्वन्ति।

सुहासः - आगच्छ, तां कथां पठावः...



एकदा महर्षिः रामदासः स्वशिष्येन सह जापान-देशमगच्छत्। तस्मिन् काले सः केवलं फलाहारमेव करोति स्म। महर्षिः रामदासः स्वशिष्यम् अवदत्-''पुत्र! गच्छ, आपणात् सद्योजातानि मनोरमानि च फलानि आनय।''

शिष्यः आपणं अगच्छत् परं कुत्रापि सः नूतनानि शोभनानि च फलानि न प्राप्नोत्। गृहमागत्य शिष्यः गुरुमवदत्- ''गुरुवर! आपणे तु सद्योजातानि मनोरमानि च फलानि न सन्ति।''

गुरुः अकथयत्-''अलं चिन्तया। सायंकाले आवां रेलयानेन टोक्योनगरं गमिष्यावः तदा त्वं रेलयान-स्थानकात् फलानि विन्दसि।''

काले यदा तौ रेलयान-स्थानकम् अगच्छताम् तदा शिष्यः फलानां प्राप्तुं प्रयत्नम् अकरोत् परं सः तत्रापि जातानि शोभनानि च फलानि न प्राप्नोत्। गुरोः समीपम् आगत्य शिष्यः अवदत्- ''गुरुवर! एतत् प्रतीयते जापाननगरे सद्योजातानि मनोरमानि च फलानि न सन्ति।''

तयोः वार्तां एकः जापानी-नागरिकः अश्रृणोत्। सः शीघ्रं गत्वा एकस्मिन् करण्डके नूतनानि शोभनानि च फलानि आनयत् महर्षये च अयच्छत्।



एषः कोऽपि फलविक्रेता अस्ति-इति मत्वा महर्षिः तम् नागरिकं फलानां मूल्यम् अपृच्छत्। जापानी-नागरिक तेषां फलानां मूल्यं न गृहीत्वा तं न्यवेदयत्-"एतेषां फलानां मूल्यम् एतदेव यत् भवान् स्वदेशे गत्वा एत न कथयतु यत् जापानदेशे सद्योजातानि मनोरमानि च फलानि न सन्ति।"

महर्षिः रामदासः तस्य अद्भुत-देशप्रेम दृष्ट्वा प्रसन्नः भूत्वा अकथयत्-"यस्य देशस्य नागरिकाः एतावन्त देशप्रेमिणः जनाः सन्ति सः देशः कदापि निन्दायाः पात्रं न भवेत्।"

## व्याकरण-बिन्दु....

**सन्धिः** - द्वयोः वर्णयोः मेलनेन यः विकारः भवति सः **सन्धिः** कथ्यते।

यथा - च + अस्ति = चास्ति | देव + ऋषिः = देवर्षिः

यथा + एव = यथैव | कः + अपि = कोऽपि

**संयोगः** - व्यञ्जनेन सह स्वरस्य मेलनम् **संयोगः** कथ्यते।

यथा - देशम् + अगच्छत् = देशमगच्छत् | पूर्वम् + एव = पूर्वमेव

फलाहारम् + एव = फलाहारमेव | शिष्यम् + अपृच्छत् = शिष्यमपृच्छत्

## शब्दार्थाः (Word Meanings)

| | | | |
|---|---|---|---|
| आपणात् | = बाज़ार से (from market) | रेलयानात् | = रेलगाड़ी से (by train) |
| सद्योजातानि | = ताज़े (fresh) | रेलयान-स्थानकम् | = रेलवे स्टेशन (railway station) |
| प्रयत्नम् | = कोशिश (effort) | शोभनम् | = अच्छे (good) |
| अप्नोत् | = प्राप्त किए (got) | प्रतीयते | = प्रतीत होता है (seems) |
| वार्ता | = बातचीत (conversation) | अश्रृणोत् | = सुना (listened) |
| करण्डके | = टोकरी में (in the basket) | फलविक्रेता | = फल बेचने वाला (fruit seller) |
| मूल्यम् | = दाम (price) | कदापि न | = कभी नहीं (never) |

## अभ्यासः

### संकलनात्मकं मूल्यांकनम् (Summative Assessment)

1. उच्चैः पठत स्मरत च। (Read and learn)

| | | | |
|---|---|---|---|
| महर्षिः | सद्योजातानि | मनोरमानि | रेलयान-स्थानकम् |
| करण्डके | फलविक्रेता | प्राप्नोत् | अश्शृणोत् |

2. उचितम् उत्तरं चिनुत। (Tick mark ✓ the correct answer)

(क) महर्षिः रामदासः कुत्र अगच्छत्?
(i) चीनदेशम् (ii) रूसदेशम् (iii) जापानदेशम् (iv) प्रयागनगरम्

(ख) फलानि आनेतुं शिष्यः कुत्र अगच्छत्?
(i) आपणम् (ii) नगरम् (iii) गृहम् (iv) देवालयम्

(ग) फलानां मूल्यं कः पृच्छति?
(i) शिष्यः (ii) नागरिकः (iii) बालकः (iv) महर्षिः

(घ) जापानीनागरिकः कानि आनयति?
(i) वस्तूनि (ii) फलानि (iii) पात्राणि (iv) वस्त्राणि

(ङ) महर्षिः रेलयानेन कुत्र गच्छति?
(i) टोक्योनगरं (ii) शिकागोनगरम् (iii) चेन्नईनगरम् (iv) पटनानगरम्

3. एकपदेन उत्तरत। (Answer in one word)

(क) किं नाम महर्षिः आसीत्? ..........
(ख) महर्षिः केन सह टोक्योनगरमगच्छत्? ..........
(ग) तस्मिन् काले महर्षिः किं खादति स्म? ..........
(घ) महर्षिः टोक्योनगरं केन यानेन गच्छति? ..........
(ङ) महर्षिः फलानां मूल्यं कं पृच्छति? ..........

4. पूर्णवाक्येन उत्तरत। (Answer in full sentence)

(क) महर्षिः रामदासः स्वशिष्यं किम् आनेतुम् अकथयत्?
..........

(ख) शिष्यः किम् अनुभवति?
..........

(ग) तयोः वार्तां कः अश्शृणोत्?
..........

(घ) जापानी-नागरिकः किम् अकरोत्?
..........

(ङ) जापानीनागरिकः फलानां मूल्यविषये किम् अवदत्?
..........

5. विलोमपदानि चित्वा लिखत। (Write the opposites)

दुःखितः, सायंकाले, पुरातनानि, शिष्यः, निन्दा, दूरम्

| | | | |
|---|---|---|---|
| नूतनानि | ................ | गुरुः | ................ |
| प्रातःकाले | ................ | प्रसन्नः | ................ |
| समीपम् | ................ | प्रशंसा | ................ |

6. शुद्धं विकल्पं चिनुत। (Tick mark (✓) the correct option)

(क) 'कुत्रापि' इत्यस्य सन्धिच्छेदः अस्ति–

(i) कु+त्रापि ☐ (ii) कुत्र+अपि ☐ (iii) कुत्रा+पि ☐ (iv) कुत्राप्+इ ☐

(ख) 'शोभनानि फलानि' अत्र शोभनानि पदमस्ति–

(i) संज्ञापदम् ☐ (ii) सर्वनामपदम् ☐ (iii) क्रियापदम् ☐ (iv) विशेषणपदम्

(ग) 'कोऽपि' इत्यस्य सन्धिच्छेदः अस्ति–

(i) को + अपि ☐ (ii) कः + अपि ☐ (iii) क + अपि ☐ (iv) को + पि

(घ) 'आपणात्' अत्र विभक्तिः अस्ति–

(i) षष्ठी ☐ (ii) चतुर्थी ☐ (iii) पञ्चमी ☐ (iv) तृतीया

(ङ) 'आनय' अत्र लकारः अस्ति–

(i) लोट्लकारः ☐ (ii) लङ्लकारः ☐ (iii) लट्लकारः ☐ (iv) लृट्लकारः

7. मञ्जूषातः पर्यायपदानि चित्वा लिखत। (Write synonyms)

हर्षितः वार्तालापम् मनोरमानि प्रयासम् समये अचिरम्

| | | | |
|---|---|---|---|
| काले | ................ | वार्ताम् | ................ |
| शोभनानि | ................ | शीघ्रम् | ................ |
| प्रयत्नम् | ................ | प्रसन्नः | ................ |

8. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत। (Complete the sentences)

दृष्ट्वा सद्योजातानि स्वशिष्येन फलाहारम् वार्ताम् मूल्यम्

(क) महर्षिः ................ सह जापानदेशमगच्छत्।

(ख) तस्मिन् काले महर्षिः ................ एव करोति स्म।

(ग) शिष्यः ................ फलानि आनेतुं गच्छति।

(घ) तयोः ................ एकः जापानी-नागरिकः अशृणोत्।

(ङ) महर्षिः तं नागरिकं फलानां ................ पृच्छति।

(च) महर्षिः तस्य अद्भुतदेशप्रेम ................ प्रसन्नः अभवत्।

9. उदाहरणानुसारं पदानि पृथक्-पृथक् कुरुत। (Separate the words)

देशमगच्छत् – देशम् + अगच्छत्

फलाहारमेव – ................ + ................

गृहमागत्य – ................ + ................

गुरुमवदत् – ................ + ................

समीपमागत्य – ................ + ................

10. सन्धिं कुरुत। (Join the words)

कुत्र + अपि = कुत्रापि

तत्र + अपि = ................

कः + अपि = ................

महा + ऋषिः = ................

सद्यः + जातानि = ................

## रचनात्मकं मूल्यांकनम् (Formative Assessment)

1. चित्रं दृष्ट्वा मञ्जूषातः पदानि प्रयोज्य पंचवाक्यानि लिखत। (Write five sentences by using the words from the box)

| | | | | | |
|---|---|---|---|---|---|
| बालाः | चटकाः | विकसन्ति | चित्रम् | उद्यानस्य | जनाः |
| पुष्पाणि | खेलन्ति | कूजन्ति | एतत् | भ्रमन्ति | अत्र |



................................................

2. पाठे आगतानि विशेषणपदानि लिखत। (Write adjective words from lesson)

................................................

भारतस्य प्रमुखदेशभक्तानां नामानि लिखत। (Write the name of the persons who love nation)

................................................

...तुम्हें नमस्कार है। ... हम अज्ञान रूपी
शारदा देवी को नमस्कार है। वीणा वादिनी को नमस्कार है। विद्या देने वाली वाणी
देवी को नमस्कार है।

# 1. अद्भुतं देशप्रेम ( सन्धि-संयोगः )

हिंदी अर्थ–

सुगन्धा – सुहास! तुम क्या कर रहे हो?

सुहास – मैं देशभक्ति की कहानियों को इकट्ठा कर रही हूँ।

सुगन्धा – क्या तुम जानते हो कि भारतीयों के समान अन्य देशों के लोग भी अपने देश से प्रेम करते हैं?

सुहास – तुम कैसे जानती हो?

सुगन्धा – हमारी पुस्तक में एक अनोखी कथा है, जो प्रकट करती है कि अन्य देशवासी भी अपने देश से प्रेम करते हैं।

सुहास – आओ, उस कथा को हम दोनों पढ़ते हैं–

एक बार महर्षि रामदास अपने शिष्य के साथ जापान देश गए। उस समय वे केवल फलाहार ही करते थे। महर्षि रामदास अपने शिष्य से बोले–"पुत्र जाओ, बाज़ार से ताज़े और अच्छे फल लाओ।"

शिष्य बाज़ार गया परंतु कहीं भी उसे ताज़े और अच्छे फल नहीं मिले। घर आकर शिष्य गुरुजी से बोला–"गुरुवर! बाज़ार में तो ताज़े और अच्छे फल नहीं हैं।"

गुरुजी ने कहा–"चिंता मत करो। शाम को हम दोनों रेलगाड़ी से टोक्योनगर जाएँगे तब तुम रेलवे स्टेशन से फल ले लेना।"

शाम के समय जब वे दोनों रेलवे स्टेशन गए तब शिष्य ने फल प्राप्त करने की कोशिश की परंतु उसे वहाँ भी ताज़े और अच्छे फल नहीं मिले। गुरु के समीप आकर शिष्य बोला–"गुरवर! ऐसा प्रतीत होता है कि जापान में ताज़े और अच्छे फल नहीं हैं।

उन दोनों की बातचीत एक जापानी नागरिक ने सुनी। वह शीघ्र जाकर एक टोकरी में ताज़े और अच्छे फल लाया और महर्षि को दिए।"

यह कोई फल बेचने वाला है–ऐसा मानकर महर्षि ने उस नागरिक से फलों का मूल्य पूछा। जापानी नागरिक ने उन फलों का मूल्य न लेकर उनसे निवेदन

किया–"इन फलों का मूल्य यही है कि आप अपने देश जाकर यह मत कहना कि जापान देश में ताज़े और अच्छे फल नहीं हैं।

महर्षि रामदास ने उसके अद्भुत देशप्रेम को देखकर प्रसन्न होकर कहा–"जिस देश के नागरिक इतने देशप्रेमी हैं। वह देश कभी भी निन्दा का पात्र नहीं होगा।"

## अभ्यासः

### संकलनात्मकं मूल्यांकनम्

1. **उच्चैः पठत स्मरत च–** (ऊँचे स्वर में पढ़िए और याद कीजिए–)
   दिए गए शब्दों को पढ़कर छात्र उन्हें याद करें।
2. **उचितम् उत्तरं चिनुत–** (उचित उत्तर चुनिए–)
   (क) (*iii*) जापानदेशम् ✓ (ख) (*i*) आपणम् ✓
   (ग) (*iv*) महर्षिः ✓ (घ) (*ii*) फलानि ✓
   (ङ) (*i*) टोक्योनगरम् ✓
3. **एकपदेन उत्तरत–** (एक पद में उत्तर दीजिए–)
   (क) रामदासः (ख) शिष्येन सह (ग) फलाहारम्
   (घ) रेलयानेन (ङ) जापानी-नागरिकम्
4. **पूर्णवाक्येन उत्तरत–** (पूरे वाक्य में उत्तर दीजिए–)
   (क) महर्षिः रामदासः स्वशिष्यं सद्योजातानि मनोरमानि च फलानि आनेतुम् अकथयत्।
   (ख) शिष्यः अनुभवति यत् जापान-देशे सद्योजातानि मनोरमानि च फलानि न सन्ति।
   (ग) तयोः वार्तां एकः जापानी-नागरिकः अश्रृणोत्।
   (घ) जापानीनागरिकः शीघ्रं गत्वा एकस्मिन् करण्डके नूतनानि शोभनानि च फलानि आनयत् महर्षये च अयच्छत्।
   (ङ) जापानी-नागरिकः तं न्यवेदयत्–एतेषां फलानां मूल्यम् एतदेव यत् भवान् स्वदेशे गत्वा एतत् न कथयतु यत् जापानदेशे सद्योजातानि मनोरमानि च फलानि न सन्ति।
5. **विलोमपदानि चित्वा लिखत–** (विलोम शब्द चुनकर लिखिए–)

| | | |
|---|---|---|
| नूतनानि – पुरातनानि | गुरुः – शिष्यः | प्रातःकाले – सांयकाले |
| प्रसन्नः – दुःखितः | समीपम् – दूरम् | प्रशंसा – निन्दा |

6. **शुद्धं विकल्पं चिनुत–** (शुद्ध विकल्प चुनिए–)
   (क) (*ii*) कुत्र + अपि ✓ (ख) (*iv*) विशेषणपदम् ✓
   (ग) (*i*) कः + अपि ✓ (घ) (*iii*) पञ्चमी ✓
   (ङ) (*i*) लोट्लकारः ✓

7. **मञ्जूषातः पर्यायपदानि चित्वा लिखत–** (मञ्जूषा से पर्यायवाची शब्द चुनकर लिखिए–)

| | | |
|---|---|---|
| काले – समये | वार्ताम् – वार्तालापम् | शोभनानि – मनोरमानि |
| शीघ्रम् – अचिरम् | प्रयत्नम् – प्रयासम् | प्रसन्नः – हर्षितः |

8. **मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत–** (मञ्जूषा से पद चुनकर वाक्य पूरे कीजिए–)

(क) महर्षिः **स्वशिष्येन** सह जापानदेशमगच्छत्।
(ख) तस्मिन् काले महर्षिः **फलाहारम्** एव करोति स्म।
(ग) शिष्यः **सद्योजातानि** फलानि आनेतुं गच्छति।
(घ) तयोः **वार्ताम्** एकः जापानी-नागरिकः अशृणोत्।
(ङ) महर्षिः तं नागरिकं फलानां **मूल्यं** पृच्छति।
(च) महर्षिः तस्य अद्भुतदेशप्रेम **दृष्ट्वा** प्रसन्नः अभवत्।

9. **उदाहरणानुसारं पदानि पृथक्-पृथक् कुरुत–** (उदाहरण के अनुसार पदों को अलग-अलग कीजिए–)

| | |
|---|---|
| देशमगच्छत् – देशम् + अगच्छत् | फलाहारमेव – फलाहारम् + एव |
| गृहमागत्य – गृहम् + आगत्य | गुरुमवदत् – गुरुम् + अवदत् |
| समीपमागत्य – समीपम् + आगत्य | |

10. **सन्धिं कुरुत–** (सन्धि कीजिए–)

| | |
|---|---|
| कुत्र + अपि = कुत्रापि | तत्र + अपि = तत्रापि |
| कः + अपि = कोऽपि | महा + ऋषिः = महर्षिः |
| सद्यः + जातानि = सद्योजातानि | |

## रचनात्मकं मूल्यांकनम्

1. **चित्रं दृष्ट्वा मञ्जूषातः पदानि प्रयोज्य पञ्चवाक्यानि लिखत–** (चित्र देखकर मञ्जूषा से पद लेकर पाँच वाक्य लिखिए–)

   1. एतत् उद्यानस्य चित्रम् अस्ति।
   2. अत्र बालाः खेलन्ति।
   3. जनाः भ्रमन्ति।
   4. पुष्पाणि विकसन्ति।
   5. चटकाः कूजन्ति।

2. **पाठे आगतानि विशेषणपदानि लिखत–** (पाठ में आए हुए विशेषण पद लिखिए–)

   नूतनानि सद्योजातानि मनोरमानि शोभनानि
   एकः अद्भुत देशप्रेमिणः

3. **भारतस्य प्रमुखदेशभक्तानां नामानि लिखतु–** (भारत के प्रमुख देश भक्तों के नाम लिखिए–)

   सुभाषचन्द्रः बोसः चन्द्रशेखरः आजादः भगतसिंहः
   राजगुरुः लालालाजपतरायः मदनमोहनमालवीयः